# Shri Chinnamastashtottarashatanama stotram

# શ્રીછિન્નમસ્તાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : ChinamastAShTottarashatanAmastotram

File name : chinnama.itx

Category : aShTottarashatanAma, devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Author : Traditional

Transliterated by : Michael Magee ac70 at cityscape.co.uk

Proofread by : Michael Magee ac70 at cityscape.co.uk

Latest update : Dec. 22, 1997, Sept, 15, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 2, 2025

*sanskritdocuments.org*

# શ્રીછિન્નમસ્તાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રીપાર્વત્યુવાચ –

નામ્નાં સહસ્રમં પરમં છિન્નમસ્તા-પ્રિયં શુભમ્ ।
કથિતં ભવતા શમ્ભો સદ્યઃ શત્રુ-નિકૃન્તનમ્ ॥ ૧॥

પુનઃ પૃચ્છામ્યહં દેવ કૃપાં કુરુ મમોપરિ ।
સહસ્ર-નામ-પાઠે ચ અશક્તો યઃ પુમાન્ ભવેત્ ॥ ૨॥

તેન કિં પઠ્યતે નાથ તન્મે બ્રૂહિ કૃપા-મય ।

શ્રી સદાશિવ ઉવાચ -

અષ્ટોત્તર-શતં નામ્નાં પઠ્યતે તેન સર્વદા ॥ ૩॥

સહસ્ર્-નામ-પાઠસ્ય ફલં પ્રાપ્નોતિ નિશ્ચિતમ્ ।
ૐ અસ્ય શ્રીછિન્નમસ્તાષ્ટોત્તર-શત-નામ-સ્તોત્રસ્ય સદાશિવ
ઋષિરનુષ્ટુપ્ છન્દઃ શ્રીછિન્નમસ્તા દેવતા
મમ-સકલ-સિદ્ધિ-પ્રાપ્તયે જપે વિનિયોગઃ ॥

ૐ છિન્નમસ્તા મહાવિદ્યા મહાભીમા મહોદરી ।
ચણ્ડેશ્વરી ચણ્ડ-માતા ચણ્ડ-મુણ્ડ્-પ્રભઞ્જિની ॥ ૪॥

મહાચણ્ડા ચણ્ડ-રૂપા ચણ્ડિકા ચણ્ડ-ખણ્ડિની ।
ક્રોધિની ક્રોધ-જનની ક્રોધ-રૂપા કુહૂ કલા ॥ ૫॥

કોપાતુરા કોપયુતા જોપ-સંહાર-કારિણી ।
વજ્ર-વૈરોચની વજ્રા વજ્ર-કલ્પા ચ ડાકિની ॥ ૬॥

ડાકિની કર્મ-નિરતા ડાકિની કર્મ-પૂજિતા ।
ડાકિની સઙ્ગ-નિરતા ડાકિની પ્રેમ-પૂરિતા ॥ ૭॥

ખટ્વાઙ્ગ-ધારિણી ખર્વા ખડ્ગ-ખપ્પર-ધારિણી ।
પ્રેતાસના પ્રેત-યુતા પ્રેત-સઙ્ગ-વિહારિણી ॥ ૮॥

છિન્ન-મુણ્ડ-ધરા છિન્ન-ચણ્ડ-વિદ્યા ચ ચિત્રિણી ।
ઘોર-રૂપા ઘોર-દૃષ્ટર્ઘોર-રાવા ઘનોવરી ॥ ૯॥

યોગિની યોગ-નિરતા જપ-યજ્ઞ-પરાયણા ।
યોનિ-ચક્ર-મયી યોનિર્યોનિ-ચક્ર-પ્રવર્તિની ॥ ૧૦॥

યોનિ-મુદ્રા-યોનિ-ગમ્યા યોનિ-યન્ત્ર-નિવાસિની ।
યન્ત્ર-રૂપા યન્ત્ર-મયી યન્ત્રેશી યન્ત્ર-પૂજિતા ॥ ૧૧॥

કીર્ત્યા કર્પાદની કાલી કઙ્કાલી કલ-કારિણી ।
આરક્તા રક્ત-નયના રક્ત-પાન-પરાયણા ॥ ૧૨॥

ભવાની ભૂતિદા ભૂતિર્ભૂતિ-દાત્રી ચ ભૈરવી ।
ભૈરવાચાર-નિરતા ભૂત-ભૈરવ-સેવિતા ॥ ૧૩॥

ભીમા ભીમેશ્વરી દેવી ભીમ-નાદ-પરાયણા ।
ભવારાધ્યા ભવ-નુતા ભવ-સાગર-તારિણી ॥ ૧૪॥

ભદ્ર-કાલી ભદ્ર-તનુર્ભદ્ર-રૂપા ચ ભદ્રિકા ।
ભદ્ર-રૂપા મહા-ભદ્રા સુભદ્રા ભદ્રપાલિની ॥ ૧૫॥

સુભવ્યા ભવ્ય-વદના સુમુખી સિદ્ધ-સેવિતા ।
સિદ્ધિદા સિદ્ધિ-નિવહા સિદ્ધાસિદ્ધ-નિષેવિતા ॥ ૧૬॥

શુભદા શુભફ઼્ગા શુદ્ધા શુદ્ધ-સત્વા-શુભાવહા ।
શ્રેષ્ઠા દૃષ્ઠિ-મયી દેવી દૃષ્ઠિ-સંહાર-કારિણી ॥ ૧૭॥

શર્વાણી સર્વગા સર્વા સર્વ-મઙ્ગલ-કારિણી ।
શિવા શાન્તા શાન્તિ-રૂપા મૃડાની મદાનતુરા ॥ ૧૮॥

ઇતિ તે કથિતં દેવિ સ્તોત્રં પરમ-દુર્લભમં ।
ગુહ્યાદ્-ગુહ્ય-તરં ગોપ્યં ગોપનિયં પ્રયત્નતઃ ॥ ૧૯॥

કિમત્ર બહુનોક્તેન ત્વદગ્રં પ્રાણ-વલ્લભે ।
મારણં મોહનં દેવિ હ્યુચ્ચાટનમતઃ પરમમ્ ॥ ૨૦॥

સ્તમ્ભનાદિક-કર્માણિ ઋદ્ધયઃ સિદ્ધયોઽપિ ચ ।
ત્રિકાલ-પઠનાદસ્ય સર્વે સિધ્યન્ત્યસંશયઃ ॥ ૨૧॥

મહોત્તમં સ્તોત્રમિદં વરાનને મયેરિતં નિત્ય મનન્ય-બુદ્ધયઃ ।

પઠન્તિ યે ભક્તિ-યુતા નરોત્તમા ભવેન્ન તેષાં રિપુભિઃ પરાજયઃ ॥ ૨૨॥

॥ ઇતિ શ્રીછિન્નમસ્તાષ્ટોત્તરશતનામ સ્તોત્રમ્ ॥

Encoded and proofread by Mike Magee ac70@cityscape.co.uk

Last updated October 20 1998 for HTML version

*Shri Chinnamastashtottarashatanama stotram*

pdf was typeset on March 2, 2025

Please send corrections to *sanskrit@cheerful.com*